F.Y.
March 2017

Reg. No. ......................................

Name ..........................................

645

## Part - III

## SANSKRIT SAHITYA

Maximum : 80 Scores

Time : 2½ Hours
Cool off time : **15** Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are neither allowed to write your answers nor to discuss anything with others during the 'cool off time'.
- Use the 'cool off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except nonprogrammable calculators are not allowed in the Examination Hall.

**निर्देशा: –**

सर्वे प्रश्ना: समाधेया: ।

प्रश्नान् सावधानं पठित्वा उत्तरयत ।

**1.** अध: प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

शिक्षा क्षयं गच्छति कालपर्ययात्

सुबद्धमूला निपतन्ति पातपा: ।

जलं जलस्थानगतं च शुष्यति

हुतं च दत्तं च तथैव तिष्ठति ।।

(क) रेखाङ्कितपदं विश्लेषयत । **(1)**

(ख) किं किं तथैवतिष्टति? **(2)**

(ग) श्लोकस्याशयं स्ववाक्यै: लिखत । **(3)**

**2.** अधः प्रदत्तं श्लोकं पठित्वा सन्तः कार्याणि कथं अवगच्छेत् इति टीकां एकां लिखत ।

पुराणमित्येव न साधु सर्वं

न चापि काव्यं नवमित्यवद्यम् ।

सन्तः परीक्ष्यान्यतरद् भजन्ते

मूढः परप्रत्ययनेयबुद्धिः ।। **(4)**

**3.** रेखाङ्कितपदानां स्थानेषु समानार्थकयुक्तं पदं उपयुज्य पूरयत ।

यति एनं सजीवं करिष्यति ततः सर्वान् अपि व्यपादयिष्यति इति तेन अभिहितः । ततस्तृतीय आह धिङ् मूर्ख नाहं विद्यां विफलां करोमि । ततः तेनाभिहितं –तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि । तथानुष्ठिते यावत् सजीवः कृतः तावत् ते त्रयोऽपि सिंहेन उत्थाय व्यपादिताः स च पुनः वृक्षात् अवतीर्य <u>गृहं</u> गतः ।

( हनिष्यति, वासस्थानम्, अखिलान्, ब्रूते, सद्य ) **(4)**

**4.** गद्यभागे तृतीयेन किमुक्तम्? **(2)**

**5.** पञ्चतन्त्रस्य कर्ता कः?

(विष्णु शर्मा, कालिदासः, सुकुमारः) **(1)**

**6.** विद्यया का उत्तमा?

(अभ्यासः, प्रयत्नः, बुद्धिः) **(1)**

7. अधः प्रदत्तेषु भवतः इष्टतमः श्लोकः कः इति सकारणं विशदयत ।

* सा निःशसन्ती शोकार्त्ता कोपोपहतचेतना ।
  आर्ता व्यसृजदश्रूणि मैथिली विललाप च ।।

* सा ददर्श कपिं तत्र पश्रितं प्रियवादिनम् ।
  फुल्लाशोकोत्क्राभासं तप्तचामीकरेक्षणम् ।।

* दुःखेन बुबुधे सीतां हनूमाननलंकृताम् ।
  संस्कारेण् यथा हीनां वाचमर्थान्तरं गताम् ।। **(6)**

8. अधः प्रदत्तेषु एकमधिकृत्य लखु टिप्पणि लिखत ।

   मेल्पत्तूर् नारायणभट्टपादाः ।

   कुलशेखरः ।

   डा. के. एन्. एषुत्तच्छन् । **(5)**

9. अधः प्रदत्त गद्यभागं पठित्वा प्रश्नानामुत्तराणि लिखत ।

आधुनिक संस्कृतकविषु अन्यतमोऽयं महानुभावः डा. पि. के. नारायणपिल्ला महाभागः महाकाव्यद्वयस्य कर्ता भवति । विवेकानन्दस्वामिनः चरितमुपजीव्य विश्वभानुः इति, श्रीरामकृष्णपरमहंसचरितम् उपजीव्य धर्मसागरः इति च महाकाव्यद्वयं तेन रचितम् । अस्य विश्वभानुनामकं महाकाव्यं उत्तरप्रदेशसर्वकारेण कालिदास सम्मानेन पुरस्कृतम् । केरलीयसाहित्य अक्कदमी पुरस्कारः च अयमलभत । पण्डितवरेण्योऽयं केरलसर्वकलाशालायाः मलयालविभागस्य प्रथमाध्यक्षपदवीम् अलंकृतवान् । श्रीशङ्कराचार्य संस्कृतसर्वकलाशाला संस्थापनविषये एकाङ्कसमितिरूपेण विषयान् पर्यालोच्य आयोगनिर्देशान् समर्पितवान् ।

**प्रश्नाः**

(क) डा. पि. के. नारायणपिल्ला कः भवति?

(ख) विवेकानन्दस्वामिनः चरितमुपजीव्य रचितं महाकाव्यं किम्?

(ग) धर्मसागर महाकाव्ये कस्य चरितं वर्णितम्?

(घ) कालिदाससम्मनेन पुरस्कृतं महाकाव्यं किम् अस्य कृते लब्ध अन्यं पुरस्कारं किम्?

(ङ) पि. के. नारायणपिल्ला महाभागः केरलसर्वकलाशालायां किं पदवीं अलंकृतवान्? **(5)**

**10.** यथोचितं योजयत ।

| | |
|---|---|
| a) मेल्पत्तूर् नारायणभट्टपादाः । | i) धर्मसागरः । |
| b) कुलशेखरः । | ii) केरलोदयम् । |
| c) डा. के. एन्. एषुत्तच्छन् । | iii) नारायणीयम् । |
| d) डा. पि. के. नारायणपिल्ला । | iv) तपतीसंवरणम् । |

**(4)**

**11.** अधः प्रदत्तेषु भासस्य रूपकाणि चित्वा लिखत ।

| | | | |
|---|---|---|---|
| मृच्छकटिकम् | दूतवाक्यम् | शाकुन्तलम् | सुभद्राधनञ्जयम् |
| दूतघटोत्कचम् | कर्णभारम् | मध्यमव्यायोगम् | माल्विकाग्निमित्रम् |

**(4)**

**12.** प्रदत्तं नाटकांशं प्रादेशिकभाषायां अनुवादत ।

देवकी – जयत्वार्यपुत्रः ।

वसुदेवः – देवकी अर्धराज्यं खलु वर्तते । प्रसुप्तो मथुरायां सर्वो जनः । तस्मात् यावन्न कश्चित् पश्यति तावत् गृहीत्वा उपक्रमामि ।

देवकी – क्व आर्यपुत्र इमं नेष्यति?

वसुदेवः – अहमपि न जाने अथवा यत्र दैवं विधास्यति तत्र बालं गृहीत्वा उपक्रमामि ।

देवकी – आर्यपुत्र इच्छाम्येनं सुदृष्टं कर्तुम् । **(5)**

**13.** यथोचितं योजयत ।

| | |
|---|---|
| a) अवतीर्णः | i) पुत्रः |
| b) आलोकः | ii) चन्द्रः |
| c) दारकः | iii) प्रकाशः |
| d) शशाङ्कः | iv) भूलोकं प्राप्तः |

**(4)**

**14.** अधः प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।

एकदा रामचन्द्रस्य
लालयन्ती पदाम्बुजम् ।
झटित्युन्मुच्य चिक्षेप
सीता रत्नाङ्गुलीयकम् ।।

गद्यक्रमः – एकदा ...... पादाम्बुजं लालयन्ती ...... झटिति ...... उन्मुच्य .... । **(4)**

**15.** अध: प्रदत्तं श्लोकं पठित्वा सूचनानुसारं आस्वादनटीकां रचयत ।

नियम्य सा मातुल इत्यमर्षं

प्रसेदुषी मामवदच्च बाला ।

अरिर्महीयानजनिष्ट भूमौ

तवोचितं सम्प्रति चिन्तयेति ।।

**सूचना :** आमुखम्

आशयम्

स्वमतम् **(5)**

**16.** ''इत्यूचुषस्तस्य पदोपकण्ठं'' क: कं प्रति किमूचुष: ? (सूचनानुसारं विशदयत ।)

**सूचना :** – अमात्यानां आह्वानम् । वसुदेववाक्यस्य सन्देहम् । बालिकाया: वचनम् । शत्रु निर्धारणम् । न्नरदस्योक्ति: । शत्रुनाश्नोपाया: । **(8)**

**17.** मातरिश्वा इति पदस्य कोऽर्थ: ?

(अग्नि:, वायु:, जलम्) **(1)**

**18.** आनकदुन्दुभि: क: ?

(कंस:, वसुदेव:, नन्दगोप:) **(1)**

**19.** अलङ्कारम् उदाहरणेन समन्वयत ।

प्रतीपालङ्कार: – हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ।

अर्थान्तरन्यासालङ्कार: – कुरङ्गैरुत्तराङ्गाक्षैस्तब्धकर्णैरूदीक्ष्यते ।

दीपकालङ्कार: – त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधु: ।

स्वभावोक्त्यलङ्कार: – मदेन भाति कलभ: प्रतापेन् महीपति: । **(4)**

**20.** 'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते' । अत्र उपमा वाचक शब्दं किम्?

(कृष्ण, इव, कीर्तिः) **(1)**

**21.** वृत्तं लक्षणेन योजयत ।

| | |
|---|---|
| a) यदि तौ जगौ गः । | i) द्रुतविलम्बितम् । |
| b) जतजास्ततो गौ । | ii) इन्द्रवज्रा । |
| c) नभौ भरौ । | iii) वसन्ततिलका । |
| d) तभजाः जगौ गः । | iv) उपेन्द्रवज्रा । |

**(4)**

**22.** 'उपमा' – इत्यस्य गणं निर्णयत ।

(तगणः, मगणः, नगणः) **(1)**